# का शि का

## षष्ठोऽध्यायः

### प्रथमः पादः

### एकाचो द्वे प्रथमस्य । (१/२१७५)

अधिकारो[1]ऽयम् । एकाचः इति च, द्वे इति च, प्रथमस्य इति [2]च त्रितयमधिकृतं वेदितव्यम् । इत उत्तरं यद्[3]वक्ष्यामः प्राक् संप्रसारण[4]विधानात् तत्र एकाचः प्रथमस्य द्वे भवतः इत्येवं तद् वेदितव्यम् । वक्ष्यति – 'लिटि धातोरनभ्यासस्य' (६.१.८/२१७७) इति । तत्र धातोरवयवयस्यानभ्यासस्य प्रथमस्यैकाचो द्वे भवतः । जजागार । पपाच । इयाय । आर ।

एकाच इति [5]बहुव्रीहिनिर्देशः । एकोऽच् यस्य सोऽयम् एकाच् इत्यवयवेन विग्रहः । तत्र समुदायः समासार्थः । अभ्यन्तरश्च समुदायेऽवयवो भवति इति साच्कस्यैव द्विर्वचनं भवति । एवं च पच् इत्यत्र येनैवाचा समुदायः एकाच्, तेनैव तदवयवोऽच्छब्दः पशब्दश्च । तत्र पृथगवयवैकाच् न द्विरुच्यते, किं तर्हि, समुदायैकाजेव । तथाहिसकृच्छास्त्रप्रवृत्त्या सावयवः समुदायोऽनुगृह्यते । पपाच इत्यत्र प्रथमत्वं व्यपदेशिवद्भावात् । इयाय, आर इत्यत्र एकाच्त्वमपि व्यपदेशिभावादेव । द्विःप्रयोगश्च द्विर्वचनमिदम् । आवृत्तिसङ्ख्या हि द्वे इति विधीयते । तेन स एव शब्दो [6]द्विरुच्चार्यते, न च शब्दान्तरं तस्य स्थाने विधीयते ॥

### अजादेर्द्वितीयस्य । (२/२१७६)

प्रथमद्विर्वचनापवादो[7]ऽयम् । अजादेर्द्वितीयस्य एकाचो द्विर्वचनमधिक्रियते । अच् आदिर्यस्य धातोः तदवयवस्य द्वितीयस्य एकाचो द्वे भवतः । अटिटिषति । अशिशिषति । अरिरिषति । अर्तः 'स्मिपूङ्रञ्ज्वशां सनि' (७.२.७४/२६२६) इति [8]इट् क्रियते । तस्मिन् कृते गुणे च रपरत्वे च 'द्विर्वचनेऽचि' (१.२.५९/२२४३) इति स्थानिवद्भावः प्राप्नोति । तत्र[9] प्रतिविधानं [10]द्विर्वचननिमित्तेऽचि इति उच्यते । न चात्र द्विर्वचननिमित्तमिट् । किं तर्हि ? कार्यी । न च कार्यी निमित्तत्वेनाश्रीयते । तथाहि – क्ङिनिमित्तयोर्गुणवृद्ध्योः प्रतिषेधो विधीयमानः शयिता इत्यत्र न भवति, न हि कार्यिणः शीङो गुणं प्रति निमित्तभावः इति । अत्र केचिद् अजादेः इति कर्मधारयात् पञ्चमीमिच्छन्ति । अच् च[11]असौ आदिश्च इत्यजादिः, तस्मात् अजादेरुत्तरस्य एकाचो द्वे भवतः इति । तेषां द्वितीयस्य इति [12]विस्पष्टर्थं [13]द्रष्टाव्यम् ॥

### न न्द्राः संयोगादयः । (३/२४४६)

द्वितीयस्य इति वर्तते । द्वितीयस्य एकाचो[14]ऽवयवभूतानां [15]न्द्राणां तदन्तर्भावात् [16]प्राप्तं द्विर्वचनं प्रतिषिध्यते । नकारदकाररेफा द्वितीयैकाचोऽवयवभूताः संयोगादयो न द्विरुच्यन्ते । उन्दिदिषति । अड्डिडिषति ।

---

1. अयम् नास्ति फ. ह. 2. एतत् त्रयम् क. 3. व्याख्यास्यामः क. 4. °विधेः क. 5. बहुव्रीहिः क. 6. द्विरुच्यते क. 7. प्रयोगः क. 8. विधीयते फ, इटि कृते क. 9. एवम् इति प्रतिविधानात् फ. ह. 10. द्विर्वचने अचि फ. 11. असौ नास्ति फ. 12. स्पष्टार्थम् क. 13. द्रष्टव्यम् नास्ति फ. 14. अवयवानां ब. फ. ह. 15. नदराणाम् क. 16. द्विर्वचनं प्राप्नोति तत् प्रतिषिध्यते क.